National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 62-63
© 2026 NJHSR
www.sanskritarticle.com

**डाँ.मिथुनकुमारशतपथी**
अतिथिअध्यापकः
(सहायकाचार्यः), साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**Correspondence:**
**डाँ.मिथुनकुमारशतपथी**
अतिथिअध्यापकः
(सहायकाचार्यः), साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# काव्यभेदा:

**डाँ. मिथुनकुमारशतपथी**

**उपक्रमः-**

यदा प्रभृति अस्याः सृष्टेः उत्पतेर्जाता, तदा प्रभृति भगवता प्रणिनां कृते विभिन्नावश्यकवस्तूनां निर्माणं कृतम्। प्राणीषु मानवः अति बुद्धिमान् मनोरञ्जनप्रियश्च सर्वाधिकतया वर्तते। मनुष्य: जीविकानिर्वाहार्थं खाद्यं पानीयं निवासस्थानं च प्राथमिकतया कामयते। अत: मनोविनोदनार्थं अन्यत् किमपि कामयते। एवमपि दुःखलाघवाय मनोविनोदनस्य अपेक्षा वर्तते। भरतमुनिनाऽपि नाट्यशास्त्रे प्रथमोऽध्याये दृश्यकाव्यस्य प्रयोजनविषये उक्तं यत्- "सर्वोपदेशजननं नाट्यमेतद् भविष्यति "

**दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनां**
**विश्रामजननं लोके नाट्यमेतद् भविष्यति।"**[1]

अतः क्रमेण साहित्यशास्त्रस्य क्रमविकाशः जातः। एवमपि लक्षणग्रन्थाणामुद्भवः साहित्यशास्त्रे समजनि।

अस्मिन् आभासपटले काव्यस्य भेदविषये मया काव्यप्रकाशः स्वीकृतो वर्तते। काव्यप्रकाशस्य रचयिता आचार्य: मम्मट : एकादशशतके आविरभूत्। तस्य काव्यप्रकाशः संस्कृतसाहित्यमूर्धन्यस्थानं अधिरोहति। मम्मट: काव्यस्य लक्षणे **"तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि"**[2] इति प्रतिपाद्य प्रथमोल्लासस्य अन्तिमभागे काव्यभेदान् प्रदर्शयति। मम्मटमतेन काव्यं त्रिविधम्– **१ . उत्तमकाव्यम्** २. **मध्यमकाव्यम् ३.अधमकाव्यम्** (अवरं/निकृष्टकाव्यम्)। पुनः अवरकाव्यस्य शब्दार्थचित्रत्वेन भेदद्वयं परिकल्पितम्। तत्रादौ उत्तमकाव्यस्य लक्षणे मम्मटेन प्रतिपाद्यते यत्- **"इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्यात् ध्वनिः बुधैः कथितः"**[3]। तत्र वृत्तौ मम्मटः लिखति- ''इदमिति काव्यं। बुधैः वैयाकरणैः प्रधानभूतस्फोटरूप-व्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः"। अतः तन्मतानुसारिभिः अन्यैरपि न्यग्भावित वाच्यव्यङ्ग - व्यञ्जन - क्षमस्य शब्दार्थ युगलस्य ध्वनिरिति व्यवहारः कृतः। अत्र इदं तात्पर्यं यत् वैयाकरणाः प्रधानरूपेण यं स्फोटं स्वशास्त्रे स्वीकुर्वन्ति, तद्रूपं यत् व्यङ्ग्यं तस्य व्यञ्जकस्य व्यञ्जने समर्थः शब्दः ध्वनिः। परन्तु तन्मतानुसारिणः साहित्यिकाः वदन्ति यत्, न्यग्भावितम् उपसर्जनी कृतम् (अप्रधानी कृतम्) वाच्यं मुख्य अर्थ: येन तादृशस्य व्यङ्ग्यस्य व्यञ्जने क्षमस्य शब्दार्थयुगलस्य ध्वनिरिति व्यवहारः कृतः। अत्र मम्मटस्य करिकानुसारेण इदं वक्तुं शक्यते यत् - यस्मिन् काव्ये वाच्यार्थ अपेक्षया व्यङ्ग्यार्थस्य चारुत्वाधिक्यं वर्तते। तत् काव्यम् उत्तमकाव्यं ध्वनिकाव्यं वा। उत्तमकाव्यस्योदाहरणम् -

**"निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः**
**मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीडागमे !**

**वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्।।"**[4]

अत्र तदन्तिकं रन्तुं गताऽसि इति प्राधान्येन अधमपदेन व्यज्यते। श्लोके तस्य अधमस्य अन्तिकं न गता परन्तु वापीं प्रति स्नातुं गता इति उक्तितः अधमपदसहाय्येन तस्य अधमस्य अन्तिकं रन्तुं गता इति व्यज्यते। वाक्यार्थ अपेक्षया अस्मिन् व्यङ्ग्यार्थे चारुत्वाधिक्यात् उत्तमकाव्यत्वेन अस्य गणना।

द्वितीय काव्यभेदो लक्षणे मम्मट वदति **"अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्गये तु मध्यमम्"**[5]**,** अत्र इदं तात्पर्यं यत् **-** अतादृशी, इत्युक्ते वाच्यात् अनतिशयिनी इति अर्थः। यत्र वाच्यार्थ अपेक्षया व्यङ्गयार्थस्य चारुत्वाधिक्यं नास्ति, तत्र मध्यमम् । नामो गुणीभुत - व्यङ्ग्यकाव्यम्। यथा -

**"ग्राम तरुणम् तरुण्या नववञ्जुलमञ्जरीसनाथकरं**[6]

**पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।"**

अत्र वञ्जुललता गृहे संकेत दत्वा नायक: न आगतः इति व्यङ्ग्यं गुणीभूतो भवति। वाच्यार्थस्य "मुखच्छायामलिनाजाता" इत्यस्य चमत्काराधिक्यात् लक्षणांनुसारेण अत्र द्वितीय प्रकारकाव्यम् - अतः परं मम्मटः अवरकाव्यविषये लक्षणं प्रदर्शयन् वदति -

**"शब्दचित्रं वाक्यचित्रं अव्यङ्गयम् त्ववरं स्मृतम्"**[7]

चित्रमिति कथनेन गुणालङ्कारयुक्तमिति ज्ञायते। 'अवरम्' इति अधमम्। अत्र अव्यङ्ग्यपदेन पूर्णतया व्यङ्ग्यशून्यमिति न मन्तव्यम्। अव्यङ्ग्यम् इत्युक्ते व्यङ्गयस्य लेश (अल्प) तया विद्यमानत्वेऽपि चमत्कारीभावः इति। अधुना मम्मट: अवरकाव्यस्य शब्दार्थचित्रभेदेन द्विविध्यं प्रकाशयति। शब्दचित्रं नाम शब्दालङ्कारस्य अनुप्रासादेः प्राधान्यमिति ज्ञातव्यम्। अर्थचित्रं नाम अर्थालङ्कारस्य उपमादेः प्राधान्यमिति ज्ञातव्यम्। अधुना शब्दचित्रस्य उदाहरणप्रसङ्गे मम्मटः लिखति।

**स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा**
**मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्नाय वः।**
**भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम**
**द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्।।**[8]

अस्मिन् श्लोके गङ्गायाः शैत्यादिकं पावनकारिणीत्वं व्यङ्ग्यरूपेण विद्यमानेत्वेऽपि अनुप्रासस्य चमत्कारात् शब्दचित्रत्वं काव्यभेदः। अर्थ चित्रं यथा-

**"विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयापि यम् ।**
**ससम्भ्रमेन्द्र द्रुतपातितार्गला निमीलिताक्षीव भियामरावती ॥"**[9]

अस्मिन् श्लोके हयग्रीबस्य पराक्रमेण भीत: इन्द्रः अमरावत्याः द्वारपिधानं कृतवान्। अत्र कवि: उत्प्रेक्षते यत्- अमरावती नारीसुलभगुणेनयुक्ता सति भयेन नयनद्वयं मुद्रणं मृतवती किम्? एतेन उत्प्रेक्षालङ्कारस्य अर्थालङ्कारमध्ये पतितस्य चारुत्वाधिक्यात् अर्थचित्रत्वम्।

**उपसंहार** :-

अनेन प्रकारेण आचार्य: मम्मट: काव्यप्रकाशे काव्यभेदान् संलक्षणं सोदाहरणं च आलोचयति।

**पाद टिप्पणी:-**

[1]ना.शा- (1.114)
[2]का.प्र-1
[3]का.प्र-1
[4]का.प्र-1
[5]का.प्र-1
[6]का.प्र-1
[7]का.प्र-1
[8]का.प्र-1
[9]का.प्र-1